# Brahmavidya Upanishad

# બ્રહ્મવિદ્યોપનિષત્

## Document Information

Text title : Brahmavidya Upanishad

File name : brahmavidya.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 40 / 108; Krishna Yajurveda - Yoga Upanishad

Latest update : Feb. 16, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# બ્રહ્મવિદ્યોપનિષત્

સ્વાવિદ્યાતત્કાર્યજાતં યદ્વિદ્યાપહ્નવં ગતમ્ ।
તદ્ધ્વંસવિદ્યાનિષ્પન્નં રામચન્દ્રપદં ભજે ॥

ૐ સહ નાववતુ ॥ સહ નૌ ભુનક્તુ ॥

સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

અથ બ્રહ્મવિદ્યોપનિષદુચ્યતે ॥

પ્રસાદાદ્બ્રહ્મણસ્તસ્ય વિષ્ણોરદ્ભુતકર્મણઃ ।
રહસ્યં બ્રહ્મવિદ્યાયા ધ્રુવાગ્નિં સમ્પ્રચક્ષતે ॥ ૧॥

ૐઇત્યેકાક્ષરં બ્રહ્મ યદુક્તં બ્રહ્મવાદિભિઃ ।
શરીરં તસ્ય વક્ષ્યામિ સ્થાનં કાલત્રયં તથા ॥ ૨॥

તત્ર દેવાસ્ત્રયઃ પ્રોક્તા લોકા વેદાસ્ત્રયોઽગ્નયઃ ।
તિસ્રો માત્રાર્ધમાત્રા ચ ત્ર્યક્ષરસ્ય શિવસ્ય તુ ॥ ૩॥

ઋગ્વેદો ગાર્હપત્યં ચ પૃથિવી બ્રહ્મ એવ ચ ।
આકારસ્ય શરીરં તુ વ્યાખ્યાતં બ્રહ્મવાદિભિઃ ॥ ૪॥

યજુર્વેદોઽન્તરિક્ષં ચ દક્ષિણાગ્નિસ્તથૈવ ચ ।
વિષ્ણુશ્ચ ભગવાન્દેવ ઉકારઃ પરિકીર્તિતઃ ॥ ૫॥

સામવેદસ્તથા દ્યૌશ્ચાહવનીયસ્તથૈવ ચ ।
ઈશ્વરઃ પરમો દેવો મકારઃ પરિકીર્તિતઃ ॥ ૬॥

સૂર્યમણ્ડલમધ્યેઽથ હ્યકારઃ શઙ્ખમધ્યગઃ ।
ઉકારશ્ચન્દ્રસંકાશસ્તસ્ય મધ્યે વ્યવસ્થિતઃ ॥ ૭॥

મકારસ્ત્વગ્નિસંકાશો વિધૂમો વિદ્યુતોપમઃ ।
તિસ્રો માત્રાસ્તથા જ્ઞેયા સોમસૂર્યાગ્નિરૂપિણઃ ॥ ૮॥

શિખા તુ દીપસંકાશા તસ્મિન્નુપરિ વર્તતે ।
અર્ધમાત્ર તથા જ્ઞેયા પ્રણવસ્યોપરિ સ્થિતા ॥ ૯॥

પદ્મસૂત્રનિભા સૂક્ષ્મા શિખા સા દૃશ્યતે પરા ।
સા નાડી સૂર્યસંકાશા સૂર્યં ભિત્ત્વા તથાપરા ॥ ૧૦॥

દ્વિસપ્તતિસહસ્રાણિ નાડીં ભિત્ત્વા ચ મૂર્ધનિ ।
વરદઃ સર્વભૂતાનાં સર્વં વ્યાપ્યાવતિષ્ઠતિ ॥ ૧૧॥

કાંસ્યઘણ્ટાનિનાદસ્તુ યથા લીયતિ શાન્તયે ।
ઓઙ્કારસ્તુ તથા યોજ્યઃ શાન્તયે સર્વમિચ્છતા ॥ ૧૨॥

યસ્મિન્વિલીયતે શબ્દસ્તત્પરં બ્રહ્મ ગીયતે ।
ધિયં હિ લીયતે બ્રહ્મ સોઽમૃતત્વાય કલ્પતે ॥ ૧૩॥

વાયુઃ પ્રાણસ્તથાકાશસ્ત્રિવિધો જીવસંજ્ઞકઃ ।
સ જીવઃ પ્રાણ ઇત્યુક્તો વાલાગ્રશતકલ્પિતઃ ॥ ૧૪॥

નાભિસ્થાને સ્થિતં વિશ્વં શુદ્ધતત્ત્વં સુનિર્મલમ્ ।
આદિત્યમિવ દીપ્યન્તં રશ્મિભિશ્ચાખિલં શિવમ્ ॥ ૧૫॥

સકારં ચ હકારં ચ જીવો જપતિ સર્વદા ।
નાભિરન્ધ્રાદ્વિનિષ્ક્રાન્તં વિષયવ્યાપ્તિવર્જિતમ્ ॥ ૧૬॥

તેનેદં નિષ્કલં વિદ્યાત્ક્ષીરાત્સર્પિર્યથા તથા ।
કારણેનાત્મના યુક્તઃ પ્રાણાયામૈશ્ચ પઞ્ચભિઃ ॥ ૧૭॥

ચતુષ્કલા સમાયુક્તો ભ્રામ્યતે ચ હૃદિસ્થિતઃ ।
ગોલકસ્તુ યદા દેહે ક્ષીરદણ્ડેન વા હતઃ ॥ ૧૮॥

એતસ્મિન્વસતે શીઘ્રમવિશ્રાન્તં મહાખગઃ ।
યાવન્નિશ્વસિતો જીવસ્તાવન્નિષ્કલતાં ગતઃ ॥ ૧૯॥

નભસ્થં નિષ્કલં ધ્યાત્વા મુચ્યતે ભવબન્ધનાત્
અનાહતધ્વનિયુતં હંસં યો વેદ હૃદ્ગતમ્ ॥ ૨૦॥

સ્વપ્રકાશચિદાનન્દં સ હંસ ઇતિ ગીયતે ।
રેચકં પૂરકં મુક્ત્વા કુમ્ભકેન સ્થિતઃ સુધીઃ ॥ ૨૧॥

નાભિકન્દે સમૌ કૃત્વા પ્રાણાપાનૌ સમાહિતઃ ।
મસ્તકસ્થામૃતાસ્વાદં પીત્વા ધ્યાનેન સાદરમ્ ॥ ૨૨ ॥

દીપાકારં મહાદેવં જ્વલન્તં નાભિમધ્યમે ।
અભિષિચ્યામૃતેનૈવ હંસ હંસેતિ યો જપેત્ ॥ ૨૩ ॥

જરામરણરોગાદિ ન તસ્ય ભુવિ વિદ્યતે ।
એવં દિને દિને કુર્યાદણિમાદિવિભૂતયે ॥ ૨૪ ॥

ઈશ્વરત્વમવાપ્નોતિ સદાભ્યાસરતઃ પુમાન્ ।
બહવો નૈકમાર્ગેણ પ્રાપ્તા નિત્યત્વમાગતાઃ ॥ ૨૫ ॥

હંસવિદ્યામૃતે લોકે નાસ્તિ નિત્યત્વસાધનમ્ ।
યો દદાતિ મહાવિદ્યાં હંસાખ્યાં પારમેશ્વરીમ્ ॥ ૨૬ ॥

તસ્ય દાસ્યં સદા કુર્યાત્પ્રજ્ઞયા પરયા સહ ।
શુભં વાઽશુભમન્યદ્વા યદુક્તં ગુરુણા ભુવિ ॥ ૨૭ ॥

તત્કુર્યાદવિચારેણ શિષ્યઃ સન્તોષસંયુતઃ ।
હંસવિદ્યામિમાં લબ્ધ્વા ગુરુશુશ્રૂષયા નરઃ ॥ ૨૮ ॥

આત્માનમાત્મના સાક્ષાદ્બ્રહ્મ બુદ્ધ્વા સુનિશ્ચલમ્ ।
દેહજાત્યાદિસમ્બન્ધાન્વર્ણાશ્રમસમન્વિતાન્ ॥ ૨૯ ॥

વેદશાસ્ત્રાણિ ચાન્યાનિ પદપાંસુમિવ ત્યજેત્ ।
ગુરુભક્તિં સદા કુર્યાચ્છ્રેયસે ભૂયસે નરઃ ॥ ૩૦ ॥

ગુરુરેવ હરિઃ સાક્ષાન્નાન્ય ઇત્યબ્રવીચ્છ્રુતિઃ ॥ ૩૧ ॥

શ્રુત્યા યદુક્તં પરમાર્થમેવ
તત્સંશયો નાત્ર તતઃ સમસ્તમ્ ।
શ્રુત્યા વિરોધે ન ભવેત્પ્રમાણં
ભવેદનર્થાય વિના પ્રમાણમ્ ॥ ૩૨ ॥

દેહસ્થઃ સકલો જ્ઞેયો નિષ્કલો દેહવર્જિતઃ ।
આપ્તોપદેશગમ્યોઽસૌ સર્વતઃ સમવસ્થિતઃ ॥ ૩૩ ॥

હંસહંસેતિ યો બ્રૂયાદ્ધંસો બ્રહ્મા હરિઃ શિવઃ ।
ગુરુવક્ત્રાત્તુ લભ્યેત પ્રત્યક્ષં સર્વતોમુખમ્ ॥ ૩૪ ॥

તિલેષુ ચ યથા તૈલં પુષ્પે ગન્ધ ઇવાશ્રિતઃ ।
પુરુષસ્ય શરીરેઽસ્મિન્સ બાહ્યાભ્યન્તરે તથા ॥ ૩૫॥

ઉલ્કાહસ્તો યથાલોકે દ્રવ્યમાલોક્ય તાં ત્યજેત્ ।
જ્ઞાનેન જ્ઞેયમાલોક્ય પશ્ચાજ્જ્ઞાનં પરિત્યજેત્ ॥ ૩૬॥

પુષ્પવત્સકલં વિદ્યાદ્ગન્ધસ્તસ્ય તુ નિષ્કલઃ ।
વૃક્ષસ્તુ સકલં વિદ્યાચ્છાયા તસ્ય તુ નિષ્કલા ॥ ૩૭॥

નિષ્કલઃ સકલો ભાવઃ સર્વત્રૈવ વ્યવસ્થિતઃ ।
ઉપાયઃ સકલસ્તદ્વદુપેયશ્ચૈવ નિષ્કલઃ ॥ ૩૮॥

સકલે સકલો ભાવો નિષ્કલે નિષ્કલસ્તથા ।
એકમાત્રો દ્વિમાત્રશ્ચ ત્રિમાત્રશ્ચૈવ ભેદતઃ ॥ ૩૯॥

અર્ધમાત્ર પરા જ્ઞેયા તત ઊર્ધ્વં પરાત્પરમ્ ।
પઞ્ચધા પઞ્ચદૈવત્યં સકલં પરિપઠ્યતે ॥ ૪૦॥

બ્રહ્મણો હૃદયસ્થાનં કણ્ઠે વિષ્ણુઃ સમાશ્રિતઃ ।
તાલુમધ્યે સ્થિતો રુદ્રો લલાટસ્થો મહેશ્વરઃ ॥ ૪૧॥

નાસાગ્રે અચ્યુતં વિદ્યાત્તસ્યાન્તે તુ પરં પદમ્ ।
પરત્વાત્તુ પરં નાસ્તીત્યેવં શાસ્ત્રસ્ય નિર્ણયઃ ॥ ૪૨॥

દેહાતીતં તુ તં વિદ્યાન્નાસાગ્રે દ્વાદશાઙ્ગુલમ્ ।
તદન્તં તં વિજાનીયાત્તત્રસ્થો વ્યાપયેત્પ્રભુઃ ॥ ૪૩॥

મનોઽપ્યન્યત્ર નિક્ષિપ્તં ચક્ષુરન્યત્ર પાતિતમ્ ।
તથાપિ યોગિનાં યોગો હ્યવિચ્છિન્નઃ પ્રવર્તતે ॥ ૪૪॥

એતત્તુ પરમં ગુહ્યમેતત્તુ પરમં શુભમ્ ।
નાતઃ પરતરં કિઞ્ચિન્નાતઃ પરતરં શુભમ્ ॥ ૪૫॥

શુદ્ધજ્ઞાનામૃતં પ્રાપ્ય પરમાક્ષરનિર્ણયમ્ ।
ગુહ્યાદ્ગુહ્યતમં ગોપ્યં ગ્રહણીયં પ્રયત્નતઃ ॥ ૪૬॥

નાપુત્રાય પ્રદાતવ્યં નાશિષ્યાય કદાચન ।
ગુરુદેવાય ભક્તાય નિત્યં ભક્તિપરાય ચ ॥ ૪૭॥

પ્રદાતવ્યમિદં શાસ્ત્રં નેતરેભ્યઃ પ્રદાપયેત્ ।
દાતાસ્ય નરકં યાતિ સિદ્ધ્યતે ન કદાચન ॥ ૪૮॥

ગૃહસ્થો બ્રહ્મચારી ચ વાનપ્રસ્થશ્ચ ભિક્ષુકઃ ।
યત્ર તત્ર સ્થિતો જ્ઞાની પરમાક્ષરવિત્સદા ॥ ૪૯॥

વિષયી વિષયાસક્તો યાતિ દેહાન્તરે શુભમ્ ।
જ્ઞાનાદેવાસ્ય શાસ્ત્રસ્ય સર્વાવસ્થોઽપિ માનવઃ ॥ ૫૦॥

બ્રહ્મહત્યાશ્વમેધાદ્યૈઃ પુણ્યપાપૈર્ન લિપ્યતે ।
ચોદકો બોધકશ્ચૈવ મોક્ષદશ્ચ પરઃ સ્મૃતઃ ॥ ૫૧॥

ઇત્યેષં ત્રિવિધો જ્ઞેય આચાર્યસ્તુ મહીતલે ।
ચોદકો દર્શયેન્માર્ગં બોધકઃ સ્થાનમાચરેત્ ॥ ૫૨॥

મોક્ષદસ્તુ પરં તત્ત્વં યજ્જ્ઞાત્વા પરમશ્નુતે ।
પ્રત્યક્ષયજનં દેહે સંક્ષેપાચ્છૃણુ ગૌતમ ॥ ૫૩॥

તેનેષ્ટ્વા સ નરો યાતિ શાશ્વતં પદમવ્યયમ્ ।
સ્વયમેવ તુ સમ્પશ્યેદ્દેહે બિન્દું ચ નિષ્કલમ્ ॥ ૫૪॥

અયને દ્વે ચ વિષુવે સદા પશ્યતિ માર્ગવિત્ ।
કૃત્વાયામં પુરા વત્સ રેચપૂરકકુમ્ભકાન્ ॥ ૫૫॥

પૂર્વં ચોભયમુચ્ચાર્ય અર્ચયેત્તુ યથાક્રમમ્ ।
નમસ્કારેણ યોગેન મુદ્રયારભ્ય ચાર્ચયેત્ ॥ ૫૬॥

સૂર્યસ્ય ગ્રહણં વત્સ પ્રત્યક્ષયજનં સ્મૃતમ્ ।
જ્ઞાનાત્સાયુજ્યમેવોક્તં તોયે તોયં યથા તથા ॥ ૫૭॥

એતે ગુણાઃ પ્રવર્તન્તે યોગાભ્યાસકૃતશ્રમૈઃ ।
તસ્માદ્યોગં સમાદાય સર્વદુઃખબહિષ્કૃતઃ ॥ ૫૮॥

યોગધ્યાનં સદા કૃત્વા જ્ઞાનં તન્મયતાં વ્રજેત્ ।
જ્ઞાનાત્સ્વરૂપં પરમં હંસમન્ત્રં સમુચ્ચરેત્ ॥ ૫૯॥

પ્રાણિનાં દેહમધ્યે તુ સ્થિતો હંસઃ સદાચ્યુતઃ ।
હંસ એવ પરં સત્યં હંસ એવ તુ શક્તિકમ્ ॥ ૬૦॥

હંસ એવ પરં વાક્યં હંસ એવ તુ વાદિકમ્ ।
હંસ એવ પરો રુદ્રો હંસ એવ પરાત્પરમ્ ॥ ૬૧॥

સર્વદેવસ્ય મધ્યસ્થો હંસ એવ મહેશ્વરઃ ।

પૃથિવ્યાદિશિવાન્તં તુ અકારાદ્યાશ્ચ વર્ણકાઃ ॥ ૬૨॥

કૂટાન્તા હંસ એવ સ્યાન્માતૃકેતિ વ્યવસ્થિતાઃ ।
માતૃકારહિતં મન્ત્રમાદિશન્તે ન કુત્રચિત્ ॥ ૬૩॥

હંસજ્યોતિરનૂપમ્યં મધ્યે દેવં વ્યવસ્થિતમ્ ।
દક્ષિણામુખમાશ્રિત્ય જ્ઞાનમુદ્રાં પ્રકલ્પયેત્ ॥ ૬૪॥

સદા સમાધિં કુર્વીત હંસમન્ત્રમનુસ્મરન્ ।
નિર્મલસ્ફટિકાકારં દિવ્યરૂપમનુત્તમમ્ ॥ ૬૫॥

મધ્યદેશે પરં હંસં જ્ઞાનમુદ્રાત્મરૂપકમ્ ।
પ્રાણોઽપાનઃ સમાનશ્ચોદાનવ્યાનૌ ચ વાયવઃ ॥ ૬૬॥

પઞ્ચકર્મેન્દ્રિયૈરુક્તાઃ ક્રિયાશક્તિબલોદ્યતાઃ ।
નાગઃ કૂર્મશ્ચ કૃકરો દેવદત્તો ધનઞ્જયઃ ॥ ૬૭॥

પઞ્ચજ્ઞાનેન્દ્રિયૈર્યુક્તા જ્ઞાનશક્તિબલોદ્યતાઃ ।
પાવકઃ શક્તિમધ્યે તુ નાભિચક્રે રવિઃ સ્થિતઃ ॥ ૬૮॥

બન્ધમુદ્રા કૃતા યેન નાસાગ્રે તુ સ્વલોચને ।
અકારેવહ્નિરિત્યાહુરુકારે હૃદિ સંસ્થિતઃ ॥ ૬૯॥

મકારે ચ ભ્રુવોર્મધ્યે પ્રાણશક્ત્યા પ્રબોધયેત્ ।
બ્રહ્મગ્રન્થિરકારે ચ વિષ્ણુગ્રન્થિર્હૃદિ સ્થિતઃ ॥ ૭૦॥

રુદ્રગ્રન્થિર્ભ્રુવોર્મધ્યે ભિદ્યતેઽક્ષરવાયુના ।
અકારે સંસ્થિતો બ્રહ્મા ઉકારે વિષ્ણુરાસ્થિતઃ ॥ ૭૧॥

મકારે સંસ્થિતો રુદ્રસ્તતોઽસ્યાન્તઃ પરાત્પરઃ ।
કણ્ઠં સઙ્કુચ્ય નાડ્યાદૌ સ્તમ્ભિતે યેન શક્તિતઃ ॥ ૭૨॥

રસના પીડ્યમાનેયં ષોડશી વોર્ધ્વગામિનિ ।
ત્રિકૂટં ત્રિવિધા ચૈવ ગોલાખં નિખરં તથા ॥ ૭૩॥

ત્રિશઙ્ખવજ્રમોઙ્કારમૂર્ધ્વનાલં ભ્રુવોર્મુખમ્ ।
કુણ્ડલીં ચાલયન્પ્રાણાન્ભેદયન્શશિમણ્ડલમ્ ॥ ૭૪॥

સાધયન્વજ્રકુમ્ભાનિ નવદ્વારાણિ બન્ધયેત્ ।
સુમનઃપવનારૂઢઃ સરાગો નિર્ગુણસ્તથા ॥ ૭૫॥

બ્રહ્મસ્થાને તુ નાદઃ સ્યાચ્છાકિન્યામૃતવર્ષિણી ।
ષટ્ચક્રમણ્ડલોદ્ધારં જ્ઞાનદીપં પ્રકાશયેત્ ॥ ૭૬॥

સર્વભૂતસ્થિતં દેવં સર્વેશં નિત્યમર્ચયેત્ ।
આત્મરૂપં તમાલોક્ય જ્ઞાનરૂપં નિરામયમ્ ॥ ૭૭॥

દૃશ્યન્તં દિવ્યરૂપેણ સર્વવ્યાપી નિરઞ્જનઃ ।
હંસ હંસ વદેદ્વાક્યં પ્રાણિનાં દેહમાશ્રિતઃ ।
સપ્રાણાપાનયોર્ગ્રન્થિરજપેત્યભિધીયતે ॥ ૭૮॥

સહસ્રમેકં દ્વયુતં ષટ્શતં ચૈવ સર્વદા ।
ઉચ્ચરન્પઠિતો હંસઃ સોઽહમિત્યભિધીયતે ॥ ૭૯॥

પૂર્વભાગે હ્યધોલિઙ્ગં શિખિન્યાં ચૈવ પશ્ચિમમ્ ।
જ્યોતિર્લિઙ્ગં ભ્રુવોર્મધ્યે નિત્યં ધ્યાયેત્સદા યતિઃ ॥ ૮૦॥

અચ્યુતોઽહમચિન્ત્યોઽહમતર્ક્યોઽહમજોઽસ્મ્યહમ્ ।
અપ્રાણોઽહમકાયોઽહમનઙ્ગોઽસ્મ્યભયોઽસ્મ્યહમ્ ॥ ૮૧॥

અશબ્દોઽહમરૂપોઽહમસ્પર્શોઽસ્મ્યહમદ્વયઃ ।
અરસોઽહમગન્ધોઽહમનાદિરમૃતોઽસ્મ્યહમ્ ॥ ૮૨॥

અક્ષયોઽહમલિઙ્ગોઽહમજરોઽસ્મ્યકલોઽસ્મ્યહમ્ ।
અપ્રાણોઽહમમૂકોઽહમચિન્ત્યોઽસ્મ્યકૃતોઽસ્મ્યહમ્ ॥ ૮૩॥

અન્તર્યામ્યહમગ્રાહ્યોઽનિર્દેશ્યોઽહમલક્ષણઃ ।
અગોત્રોઽહમગાત્રોઽહમચક્ષુષ્કોઽસ્મ્યવાગહમ્ ॥ ૮૪॥

અદૃશ્યોઽહમવર્ણોઽહમખણ્ડોઽસ્મ્યહમદ્ભુતઃ ।
અશ્રુતોઽહમદૃષ્ટોઽહમન્વેષ્ટવ્યોઽમરોઽસ્મ્યહમ્ ॥ ૮૫॥

અવાયુરપ્યનાકાશોઽતેજસ્કોઽવ્યભિચાર્યહમ્ ।
અમતોઽહમજાતોઽહમતિસૂક્ષ્મોઽવિકાર્યહમ્ ॥ ૮૬॥

અરજસ્કોઽતમસ્કોઽહમસત્ત્વોસ્મ્યગુણોઽસ્મ્યહમ્ ।
અમાયોઽનુભવાત્માહમનન્યોઽવિષયોઽસ્મ્યહમ્ ॥ ૮૭॥

અદ્વૈતોઽહમપૂર્ણોઽહમબાહ્યોઽહમનન્તરઃ ।
અશ્રોતોઽહમદીર્ઘોઽહમવ્યક્તોઽહમનામયઃ ॥ ૮૮॥

અદ્વયાનન્દવિજ્ઞાનઘનોઽસ્મ્યહમવિક્રિયઃ ।

અનિચ્છોઽહમલેપોઽહમકર્તાસ્મ્યહમદ્વયઃ ॥ ૮૯॥

અવિદ્યાકાર્યહીનોઽહમવાગ્રસનગોચરઃ ।
અનલ્પોઽહમશોકોઽહમવિકલ્પોઽસ્મ્યવિજ્વલન્ ॥ ૯૦॥

આદિમધ્યાન્તહીનોઽહમાકાશસદૃશોઽસ્મ્યહમ્ ।
આત્મચૈતન્યરૂપોઽહમહમાનન્દચિદ્ઘનઃ ॥ ૯૧॥

આનન્દામૃતરૂપોઽહમાત્મસંસ્થોહમન્તરઃ ।
આત્મકામોહમાકાશાત્પરમાત્મેશ્વરોસ્મ્યહમ્ ॥ ૯૨॥

ઈશાનોસ્મ્યહમીડ્યોઽહમહમુત્તમપૂરુષઃ ।
ઉત્કૃષ્ટોઽહમુપદ્રષ્ટા અહમુત્તરતોઽસ્મ્યહમ્ ॥ ૯૩॥

કેવલોઽહં કવિઃ કર્માધ્યક્ષોઽહં કરણાધિપઃ ।
ગુહાશયોઽહં ગોપ્તાહં ચક્ષુષશ્ચક્ષુરસ્મ્યહમ્ ॥ ૯૪॥

ચિદાનન્દોઽસ્મ્યહં ચેતા ચિદ્ઘનશ્ચિન્મયોઽસ્મ્યહમ્ ।
જ્યોતિર્મયોઽસ્મ્યહં જ્યાયાઞ્જ્યોતિષાં જ્યોતિરસ્મ્યહમ્ ॥ ૯૫॥

તમસઃ સાક્ષ્યહં તુર્યતુર્યોઽહં તમસઃ પરઃ ।
દિવ્યો દેવોઽસ્મિ દુર્દર્શો દૃષ્ટાધ્યાયો ધ્રુવોઽસ્મ્યહમ્ ॥ ૯૬॥

નિત્યોઽહં નિરવદ્યોઽહં નિષ્ક્રિયોઽસ્મિ નિરઞ્જનઃ ।
નિર્મલો નિર્વિકલ્પોઽહં નિરાખ્યાતોઽસ્મિ નિશ્ચલઃ ॥ ૯૭॥

નિર્વિકારો નિત્યપૂતો નિર્ગુણો નિઃસ્પૃહોઽસ્મ્યહમ્ ।
નિરિન્દ્રિયો નિયન્તાહં નિરપેક્ષોઽસ્મિ નિષ્કલઃ ॥ ૯૮॥

પુરુષઃ પરમાત્માહં પુરાણઃ પરમોઽસ્મ્યહમ્ ।
પરાવરોઽસ્મ્યહં પ્રાજ્ઞઃ પ્રપઞ્ચોપશમોઽસ્મ્યહમ્ ॥ ૯૯॥

પરામૃતોઽસ્મ્યહં પૂર્ણઃ પ્રભુરસ્મિ પુરાતનઃ ।
પૂર્ણાનન્દૈકબોધોઽહં પ્રત્યગેકરસોઽસ્મ્યહમ્ ॥ ૧૦૦॥

પ્રજ્ઞાતોઽહં પ્રશાન્તોઽહં પ્રકાશઃ પરમેશ્વરઃ ।
એકદા ચિન્ત્યમાનોઽહં દ્વૈતાદ્વૈતવિલક્ષણઃ ॥ ૧૦૧॥

બુદ્ધોઽહં ભૂતપાલોઽહં ભારૂપો ભગવાનહમ્ ।
મહાજ્ઞેયો મહાનસ્મિ મહાજ્ઞેયો મહેશ્વરઃ ॥ ૧૦૨॥

વિમુક્તોઽહં વિભુરહં વરેણ્યો વ્યાપકોઽસ્મ્યહમ્ ।
વૈશ્વાનરો વાસુદેવો વિશ્વતશ્ચક્ષુરસ્મ્યહમ્ ॥ ૧૦૩॥

વિશ્વાધિકોઽહં વિશદો વિષ્ણુર્વિશ્વકૃદસ્મ્યહમ્ ।
શુદ્ધોઽસ્મિ શુક્રઃ શાન્તોઽસ્મિ શાશ્વતોઽસ્મિ શિવોઽસ્મ્યહમ્ ॥ ૧૦૪॥

સર્વભૂતાન્તરાત્મહમહમસ્મિ સનાતનઃ ।
અહં સકૃદ્વિભાતોઽસ્મિ સ્વે મહિમ્નિ સદા સ્થિતઃ ॥ ૧૦૫॥

સર્વાન્તરઃ સ્વયંજ્યોતિઃ સર્વાધિપતિરસ્મ્યહમ્ ।
સર્વભૂતાધિવાસોઽહં સર્વવ્યાપી સ્વરાડહમ્ ॥ ૧૦૬॥

સમસ્તસાક્ષી સર્વાત્મા સર્વભૂતગુહાશયઃ ।
સર્વેન્દ્રિયગુણાભાસઃ સર્વેન્દ્રિયવિવર્જિતઃ ॥ ૧૦૭॥

સ્થાનત્રયવ્યતીતોઽહં સર્વાનુગ્રાહકોઽસ્મ્યહમ્ ।
સચ્ચિદાનન્દ પૂર્ણાત્મા સર્વપ્રેમાસ્પદોઽસ્મ્યહમ્ ॥ ૧૦૮॥

સચ્ચિદાનન્દમાત્રોઽહં સ્વપ્રકાશોઽસ્મિ ચિદ્ઘનઃ ।
સત્ત્વસ્વરૂપસન્માત્રસિદ્ધસર્વાત્મકોઽસ્મ્યહમ્ ॥ ૧૦૯॥

સર્વાધિષ્ઠાનસન્માત્રઃ સ્વાત્મબન્ધહરોઽસ્મ્યહમ્ ।
સર્વગ્રાસોઽસ્મ્યહં સર્વદ્રષ્ટા સર્વાનુભૂરહમ્ ॥ ૧૧૦॥

એવં યો વેદ તત્ત્વેન સ વૈ પુરુષ ઉચ્યત ઇત્યુપનિષત્ ॥

ૐ સહ નાવવતુ ॥ સહ નૌ ભુનક્તુ ॥ સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ બ્રહ્મવિદ્યોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

---

*Brahmavidya Upanishad*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*